# श्रीमद् भागवत रसिक कुटुंब

## श्रीदुर्गासप्तशती (नवम अध्याय)

॥ श्रीदुर्गायै नमः ॥

॥श्रीदुर्गासप्तशती ॥

॥ अथ नवमोऽध्यायः ॥

। ध्यानम् ।

ॐ बन्धूककाञ्चननिभं(म्) रुचिराक्षमालां(म्),
पाशाङ्कुशौ च वरदां(न्) निजबाहुदण्डैः ।
बिभ्राणमिन्दुशकलाभरणं(न्) त्रिनेत्र-
मर्धाम्बिकेशमनिशं(वँ) वपुराश्रयामि ॥

ॐ राजोवाच ॥ 1॥

विचित्रमिदमाख्यातं(म्), भगवन् भवता मम ।
देव्याश्चरितमाहात्म्यं(म्), रक्तबीजवधाश्रितम् ॥ 2॥

भूयश्चेच्छाम्यहं(म्) श्रोतुं(म्), रक्तबीजे निपातिते ।

चकार शुम्भो यत्कर्म, निशुम्भश्चातिकोपनः ॥ 3॥

ऋषिरुवाच ॥ 4॥

चकार कोपमतुलं(म्), रक्तबीजे निपातिते ।

शुम्भासुरो निशुम्भश्च, हतेष्वन्येषु चाहवे ॥ 5॥

हन्यमानं(म्) महासैन्यं(वँ), विलोक्यामर्षमुद्वहन् ।

अभ्यधावन्निशुम्भोऽथ, मुख्ययासुरसेनया ॥ 6॥

तस्याग्रतस्तथा पृष्ठे, पार्श्वयोश्च महासुराः ।

सन्दष्टौष्ठपुटाः(ख्) क्रुद्धा, हन्तुं(न्) देवीमुपाययुः ॥ 7॥

आजगाम महावीर्यः(श्), शुम्भोऽपि स्वबलैर्वृतः ।

निहन्तुं(ञ्) चण्डिकां(ङ्) कोपात् - कृत्वा युद्धं(न्) तु मातृभिः ॥ 8॥

ततो युद्धमतीवासीद् - देव्या शुम्भनिशुम्भयोः ।

शरवर्षमतीवोग्रं(म्), मेघयोरिव वर्षतोः ॥ 9॥

चिच्छेदास्ताञ्छरां(म्)स्ताभ्यां(ञ्), चण्डिका स्वशरोत्करैः ।

ताडयामास चाङ्गेषु, शस्त्रौघैरसुरेश्वरौ ॥ 10॥

निशुम्भो निशितं(ङ्) खड्गं(ञ्), चर्म चादाय सुप्रभम् ।

अताडयन्मूर्ध्नि सिं(म्)हं(न्), देव्या वाहनमुत्तमम् ॥ 11॥

ताडिते वाहने देवी, क्षुरप्रेणासिमुत्तमम् ।
निशुम्भस्याशु चिच्छेद ,चर्म चाप्यष्टचन्द्रकम् ॥ 12॥

छिन्ने चर्मणि खड्गे च, शक्तिं(ञ्) चिक्षेप सोऽसुरः ।
तामप्यस्य द्विधा चक्रे, चक्रेणाभिमुखागताम् ॥ 13॥

कोपाध्मातो निशुम्भोऽथ, शूलं(ञ्) जग्राह दानवः ।
आयातं(म्) मुष्टिपातेन, देवी तच्चाप्यचूर्णयत् ॥ 14॥

आविध्याथ गदां(म्) सोऽपि, चिक्षेप चण्डिकां(म्) प्रति ।
सापि देव्या त्रिशूलेन, भिन्ना भस्मत्वमागता ॥ 15॥

ततः(फ्) परशुहस्तं(न्) त- मायान्तं(न्) दैत्यपुङ्गवम् ।
आहत्य देवी बाणौघै- रपातयत भूतले ॥ 16॥

तस्मिन्निपतिते भूमौ, निशुम्भे भीमविक्रमे ।
भ्रातर्यतीव सङ्क्रुद्धः(फ्), प्रययौ हन्तुमम्बिकाम् ॥ 17॥

स रथस्थस्तथात्युच्चैर्- गृहीतपरमायुधैः ।
भुजैरष्टाभिरतुलैर्- व्याप्याशेषं(म्) बभौ नभः ॥ 18॥

तमायान्तं(म्) समालोक्य, देवी शङ्खमवादयत् ।
ज्याशब्दं(ञ्) चापि धनुषश् - चकारातीव दुः(स्)सहम् ॥ 19॥

पूरयामास ककुभो, निजघण्टास्वनेन च ।
समस्तदैत्यसैन्यानां(न्), तेजोवधविधायिना ॥ 20॥

ततः(स्) सिं(म्)हो महानादैस्- त्याजितेभमहामदैः ।
पूरयामास गगनं(ङ्), गां(न्) तथैव दिशो दश ॥ 21॥

ततः(ख्) काली समुत्पत्य, गगनं(ङ्) क्ष्मामताडयत् ।
कराभ्यां(न्) तन्निनादेन, प्राक्स्वनास्ते तिरोहिताः ॥ 22॥

अट्टाट्टहासमशिवं(म्), शिवदूती चकार ह ।
तैः(श्) शब्दैरसुरास्त्रेसुः(श्), शुम्भः(ख्) कोपं(म्) परं(यँ) ययौ ॥ 23॥

दुरात्मं(म्)स्तिष्ठ तिष्ठेति, व्याजहाराम्बिका यदा ।
तदा जयेत्यभिहितं(न्), देवैराकाशसं(म्)स्थितैः ॥ 24॥

शुम्भेनागत्य या शक्तिर्, मुक्ता ज्वालातिभीषणा ।
आयान्ती वह्निकूटाभा, सा निरस्ता महोल्कया ॥ 25॥

सिं(म्)हनादेन शुम्भस्य, व्याप्तं(लँ) लोकत्रयान्तरम् ।
निर्घातनिः(स्)स्वनो घोरो, जितवानवनीपते ॥ 26॥

शुम्भमुक्ताञ्छरान्देवी, शुम्भस्तत्प्रहिताञ्छरान् ।
चिच्छेद स्वशरैरुग्रैः(श्), शतशोऽथ सहस्रशः ॥ 27॥

ततः(स्) सा चण्डिका क्रुद्धा, शूलेनाभिजघान तम् ।
स तदाभिहतो भूमौ, मूर्च्छितो निपपात ह ॥ 28॥

ततो निशुम्भः(स्) सम्प्राप्य, चेतनामात्तकार्मुकः ।
आजघान शरैर्देवीं(ङ्), कालीं(ङ्) केसरिणं(न्) तथा ॥ 29॥

पुनश्च कृत्वा बाहूना- मयुतं(न्) दनुजेश्वरः ।
चक्रायुधेन दितिजश्- छादयामास चण्डिकाम् ॥ 30॥

ततो भगवती क्रुद्धा, दुर्गा दुर्गार्तिनाशिनी ।
चिच्छेद तानि चक्राणि, स्वशरैः(स्) सायकां(म्)श्च तान् ॥ 31॥

ततो निशुम्भो वेगेन, गदामादाय चण्डिकाम् ।
अभ्यधावत वै हन्तुं(न्) , दैत्यसैनासमावृतः ॥ 32॥

तस्यापतत एवाशु, गदां(ञ्) चिच्छेद चण्डिका ।
खड्गेन शितधारेण, स च शूलं(म्) समाददे ॥ 33॥

शूलहस्तं(म्) समायान्तं(न्) , निशुम्भममरार्दनम् ।
हृदि विव्याध शूलेन, वेगाविद्धेन चण्डिका ॥ 34॥

भिन्नस्य तस्य शूलेन, हृदयान्निः(स्)सृतोऽपरः ।
महाबलो महावीर्यस्- तिष्ठेति पुरुषो वदन् ॥ 35॥

तस्य निष्क्रामतो देवी, प्रहस्य स्वनवत्ततः ।
शिरश्चिच्छेद खड्गेन, ततोऽसावपतद्भुवि ॥ 36॥

ततः(स्) सिं(म्)हश्चखादोग्रं(न्), दं(म्)ष्ट्राक्षुण्णशिरोधरान् ।
असुरां(म्)स्तां(म्)स्तथा काली, शिवदूती तथापरान् ॥ 37॥

कौमारीशक्तिनिर्भिन्नाः(ख्), केचिन्नेशुर्महासुराः ।
ब्रह्माणीमन्त्रपूतेन, तोयेनान्ये निराकृताः ॥ 38॥

माहेश्वरीत्रिशूलेन , भिन्नाः(फ्) पेतुस्तथापरे ।
वाराहीतुण्डघातेन , केचिच्चूर्णीकृता भुवि ॥ 39॥

खण्डं(ङ्) खण्डं(ञ्) च चक्रेण, वैष्णव्या दानवाः(ख्) कृताः ।
वज्रेण चैन्द्रीहस्ताग्र- विमुक्तेन तथापरे ॥ 40॥

केचिद्विनेशुरसुराः(ख्) , केचिन्नष्टा महाहवात् ।
भक्षिताश्चापरे काली- शिवदूतीमृगाधिपैः ॥ 41॥

॥ इति श्रीमार्कण्डेयपुराणे सावर्णिके मन्वन्तरे देवीमाहात्म्ये
निशुम्भवधो नाम नवमोऽध्यायः ॥

उवाच 2, श्लोकाः 39, एवम् 41, एवमादितः ॥ 543॥